प्रेरितोधमनीभिः शिराभिश्च शरीरारम्भकाणि मांसानि याति ततो मांसाग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डं यावन्मांसेष्वेव तिष्ठति ततः पच्यमानात्तस्मान्मलं निर्गच्छति तद्व्यानवायुना क्षिप्तं कर्णावागत्य कर्णविड्भवति ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च ततः सूक्ष्मोभागो मांसानि पुष्णाति ततः स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शरीरारम्भकस्य मेदसःस्थानमुदरं याति ततोमेदसोऽग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावन्मेदस्येव तिष्ठति ततः पच्यमानात्तस्मान्मलो निर्गच्छति प्रस्वेदरूपः स च शीतः स्रोतस्येव तिष्ठति शरीरोष्मणा तप्तश्च तदा व्यानवायुना प्रेरितः शिरामार्गैर्लोमकूपेभ्यो बहिर्याति जिह्वादन्तकक्षामेढ्रादिमलञ्च मेदोमलमित्येके । ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागो मेदः पुष्णाति उदरे तिष्ठन् व्यानवायुना प्रेरितः स्रोतोमार्गैः सूक्ष्मास्थितान्यपि मेदांसि पुष्णाति स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शिराभिश्च शरीरारम्भकाण्यस्थीनि याति ततोऽस्थ्यग्निना पुनः पच्यमानः पञ्चाहोरात्रात् सार्द्धदण्डं च यावदस्थिष्वेव तिष्ठति ततः पच्यमानात्तस्मान्मलो निर्गच्छति स च व्यानवायुनाप्रेरितः शिराभिर्मार्गैरागत्याङ्गुलिषु नखाःस्तनौ लोमानि भवन्ति ततः सारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च तत्र सूक्ष्मोभागोव्यानवायुना प्रेरितः स्रोतोमार्गैर्मज्जस्थानानि स्थूलास्थ्यभ्यन्तराणि याति ततो मज्जाग्निना पुनः पच्यमानः पञ्चाहोरात्रात्सार्द्धदण्डञ्च यावन्मज्जन्येवावतिष्ठति । ततः पच्यमानात् तस्मान्मलं निर्गच्छति । तच्च व्यानवायुना प्रेरितं शिरामार्गैर्नयनयोरागत्य नेत्रविट् चक्षुःस्नेहश्च भवति ततःसारभूतस्य रसस्य द्वौ भागौ भवतः स्थूलः सूक्ष्मश्च । तत्र सूक्ष्मोभागोमज्जानं पुष्णाति ततः स्थूलोभागोव्यानवायुना प्रेरितोधमनीभिः शिराभिश्च शुक्रस्य स्थानं सकलं शरीरं गत्वा शरीरारम्भकेण शुक्रेण सह मिश्रितो भवति । ततः शुक्रस्याग्निना पुनः पच्यते पच्यमाने तस्मिन्मलं नास्ति स हि सहस्रधाध्मातसुवर्णवत् । उक्तञ्च "स्वाग्निभिः पच्यमानेषु मलः षट्सु रसादिषु । न शुक्रे पच्यमानेऽपि हेम्नीवाक्षये मलः" । अन्यच्च "स्वाग्निभिः पच्यमानेषु मज्जान्तेषु रसादिषु । षट्सु धातुषु जायन्ते मलानि मुनयोजगुः । यथा सहस्रधाध्माते न मलं किल काञ्चने । तथा रसे मुहुः पक्वे न मलं शुक्रतां गते" । ततः सारभूतस्य रसस्य द्वौ भागौ भवतः । स्थूलःसूक्ष्मश्च तत्र सूक्ष्मस्नेहभागः ओजस्तस्य लक्षणमाह । "ओजः सर्वशरीरस्थं स्निग्धं शीतं स्थिरं सितम् । सोमात्मकं शरीरस्य बलपुष्टिकरं मतम्" बलं चेष्टापाटवं तथा च । "चेष्टासु पाटवं यत्तु बलन्तदभिधीयते इति" यत्तु सुश्रुते रसादीनां शुक्रान्तानां धातूनां यत्परन्तेजस्तत् खल्वोजस्तदेव बलमिति तेजस्तेजोद्रवः" । अत्रायमभिप्रायः । यस्माद्रसादोजो भवति रसः सर्वधातुस्थानगतत्वात्तद्धातुवन्मन्यत इति । सर्वधातूनां स्नेहमोजःक्षीरे घृतमिव तदेव बलमिति" तत्कार्य्यकारणयोरभेदोपचारात् अभेदकथनं च चिकित्सैक्यार्थम् । "अन्यच्च "गुरु शीतं मृदु स्निग्धं सान्द्रं स्वादु स्थिरंतथाप्रसन्नं पिच्छलं सूक्ष्ममोजो दशगुणं स्मृतम्" । चरके तु "अष्टविन्दुप्रमाणन्तदीषद्रक्तं सपित्तकम् । अग्निसोमात्मकत्वेन द्विरूपं वर्णितं तु तत्" । वाग्भटश्च "ओजस्तु तेजो धातूनां शुक्रान्तानां परं स्मृतम् । हृदयस्थमपि व्यापि देहस्थितिनिबन्धनम् । यस्य प्रवृद्धौ देहस्य तुष्टिपुष्टिबलोदयाः । यन्नाशे नियतोनाशो यस्मिंस्तिष्ठति जीवनम् । निष्पद्यन्ते यतो भावाविविधा देहसंश्रयाः । उत्साहः प्रतिभा चैव लावण्यं सुकुमारता" । ततः स्थूलभागो रसोमासेन पुंसां शुक्रं स्त्रीणां त्वार्त्तवं शुक्रं च भवति । उक्तञ्च सुश्रुते "एवं मासेन रसः शुक्रीभवति स्त्रीणामार्त्तवं च भवतीति चेति" चकारात् स्त्रीणामपि शुक्रं भवति । अतएवोक्तं सुश्रुते । "योषितोऽपि स्रवत्येव शुक्रं पुंसः समागमे । तन्न गर्भस्य किञ्चित्तु करोतीति न चिन्त्यते" गर्भस्य शुद्धस्य, विकृतस्य तु गर्भस्य कारणन्तदपि भवति यत उक्तं "यदा नार्य्यावुपेयातां वृषस्यन्त्यौ कथञ्चन । मुञ्चन्त्यौ शुक्रमन्योन्यमनस्थिस्तत्र जायते" इति । एतेन स्त्रीणां सप्तमोधातुरार्त्तवं शुक्रमष्टम इति बोधितम् आशयाधिक्यवत् । "स्त्रीणां गर्भोपयोगी स्यादार्त्तवं सर्वसम्मतम् तासामपि बलं वर्णं शुक्रं पुष्टिं करोति हि" । एवं रसएव केदारकुल्यान्यायेन सर्वान्धातून् पूरयति मासेन नवदण्डोत्तरेण शुक्रमार्त्तवञ्च भवति इति सिद्धान्तः । एवं सति रसाद्रक्तमिति सङ्गतमेव ततोमांसन्ततो रक्तोत्पत्तेरनन्तरंमांसं जायते रसादेवेत्यर्थः मांसान्मेदः प्रजायते इति मांसादनन्तरं मेदः प्रजायते रसादेवेत्यर्थः । मेदसोऽस्थि मेदसोऽग्रे ऽस्थि जायते रसादेवेत्यर्थः । एवं ततोमज्जा मज्ज्ञोऽग्रे शुक्रस्य सम्भव इत्यर्थः । रसःशरीरे त्रिधा सञ्चरति तथाचोक्तम् । "रसः-